# तृतीयं सोपानम्

## <u>ग्रहयुद्धं</u>

**१) ग्रहभक्तिः, ग्रहयुगं च**

ग्रहभक्तिशब्दे भक्तिशब्दस्य अर्थः विभागः, विभाजनं इति अस्ति। अतः स्वटीकायां भट्टोत्पलेन आरम्भे लिखितं कस्मिन्देशे केषां जनानां कः ग्रहाधिपितिः अस्ति इत्यस्य विभाजनपूर्वकं विवरणं कृतम् अस्ति।

आरम्भे सूर्यस्य वर्णनम् अस्ति। नर्मदायाः पूर्वभागः नदः वंगः, सुह्मः कलिंगः, शकाः, यवनाः, मगधः प्राज्यौतिषम्(आसामः) चीनदेशः पर्वते वसन्तः किराताः यमुनायाः, दक्षिणतरः, नस्करः, वनं वैध्य योध्याः सुर्वर्णां अग्निः कर्षकः राजा सर्पः एतेषां सर्वेषां स्वामी सूर्यः वर्तते।

**२) राशिग्रहसमागमः**

अस्मिन् अध्याये आदौ चन्द्रस्य गतिः, लक्षणं दतं, यदि चन्द्वः नक्षत्राणि ग्रहाणां वा समीपतः प्रदक्षिणक्रमेण उत्तरदिशं प्रति गमनं करोति तदा नृपाणां शुभं भवति। यदि च दक्षिण दिशां प्रति गमनं करोति तदा तेषाम् अशुभं भवति। यदि चन्द्रः भौमस्य समीपतः उत्तरेण याति, तदा पर्वतवासिनां तथा च बलशालिनाम विजयः भवतिः, पृथ्वी धान्यसंपन्ना भवति। एवं बुध गुरु शुक्रादीनां सर्वेषां विषये चन्द्र भ्रमणस्य विवरणं अत्र कृतम्।

# १. नक्षत्रकूर्मविभागाध्यायः

तत्रादावेव तत्प्रविभागमाह-

**नक्षत्रत्रयवगैराग्नेयाद्यैर्व्यवस्थितैर्नवधा।**
**भारतवर्षे मध्यप्रागादिविभाजिता देशाः।।१।।**

नक्षत्रत्रयेण नववर्गास्तैर्नक्षत्रयवर्गैः। आग्नेयाद्यैः कृतिकाद्यैर्नवधा नवभिः प्रकारै-र्व्यवस्थितैः। क्व भारतवर्षे। मेरोर्दक्षिणभागो भारतवर्षं तत्र व्यवस्थितैः। तत्र च मध्यप्रागा-दिविभाजिता देशाः। मध्यदेशे मध्यभागे भारतवर्षेऽन्ये देशाः प्रागादिना पूर्वादिक्रमेण विभाजिता विभागेन स्थापिता वक्ष्यमाणविधानेनेति। गर्गः- **बृ.सं.,पृ-२५७**

अथ मध्यदेशप्रविभागमाह-

**भद्रारिमेदमाण्डव्यसाल्वनीपोज्जिहानसंख्याताः।**
**मरुवत्सघोषयामुनसारस्वतमत्स्यमाध्यमिकाः।।२।।**

**माथुरकोपज्योतिषधर्मारण्यानि शूरसेनाश्च।**

**गौरश्रीवोद्देहिकपाण्डुगुडाश्वत्थपाञ्चालाः।।३ ।।**

**साकेतकङ्ककुरुकालकोटिकुकुराश्च पारियात्रनगः।**

**औदुम्बरकापिष्ठालगजाह्वयाश्वेति मध्यमिदम्।।४ ।।**

एते देशा मध्यदेशे प्रधानाः परिगणितास्तत्रैव कृत्तिकादिनक्षत्रत्रितयम्। तद्यथा देशास्तेषु च जनपदाः। भद्राः। अरिमेदाः। माण्डव्याः। साल्वाः। नीपाः। उज्जिहानाः। संख्याताः। मरुभूः वत्साः। घोषो देशविशेषः। यामुनाः। सारस्वताः। मत्स्याः। माध्यमिकाः।

माथुरकाः। उपज्योतिषाः। धर्मारण्य्र पुण्यक्षेत्रम्। शूरसेनाः। गौरग्रीवाः। उद्देहिकाः। पाण्डुगुडाः। अश्वत्थाः। पाञ्चालाः।

साकेतदेशः। कङ्काः। कुरवः। कालकोटिः। कुकराश्च। पारियात्रो नगः पर्ततः। औदुम्बराः। कापिष्ठलाः। गजाह्वयो हस्तिनापुरमित्येवं प्रकारा मध्यमिदम्। मध्यदेशविभाग इत्यर्थः। तथा च भगवान् पराशरः- **बृ.सं.,पृ-२५८**

अथ मध्यदेशे आर्यावर्तं इति य आख्यायते तत्र जनपदाः शूरसेनोद्देहिकपाण्डुगुडाश्वत्थनीपकाञ्चनकौरवोत्तमज्योतिषभद्रारिमेदमाध्यमकिसाल्वसाकेतमत्स्यकपिष्ठजल चक्रदौलेपमाण्डव्यपाण्डुनगरगौरग्रीवपारियात्रिककुकुरराज्यौदुम्बरयामुनगजाह्वयोज्जिहान कालकोटिमाथुरोत्तरदक्षिण-पाञ्चालकुरुक्षेत्ररुर्मारण्यसारस्वताः।।

अथ पूर्वस्यां दिशि देशान् जनपदांश्चाह-

**खसमगधशिबिरगिरिमिथिलसमतटोड्राश्ववदनदन्तुरकाः।**

**प्राग्ज्योतिषलौहित्यक्षीरोदसमुद्रपुरुषादाः।।५, ६ ।।**

**उदयगिरिभद्रगौडकपौण्ड्रोत्कलकाशिमेकलाम्बष्ठाः।**

**एकपदताम्रलिप्तककोशलका वर्धमानाश्च।।७ ।।**

उदयगिरिः पर्वतः। भद्रा जनाः। गौडकाः। पौण्ड्रा जनाः। उत्कलाः। काशयः। मेकलाः। अम्बष्ठाः। एकपदाः। ताम्रलिप्तकाः। कोशलकाः। वर्धमानाश्चेति। एते आर्द्रादिके नक्षत्रत्रये देशाः। तथा च पराशरः- **बृ.सं.,पृ-२६०**

अथ पूर्वस्या माल्यवच्छिबिराञ्जनपद्मवृषभध्वजोदशिखरिदन्तुरकाः काशिकोशल-मिथिलमेकलोत्कलपुण्ड्रकर्वटसमतटोड्रगौडकभद्रद्रविडसुह्यताम्रलिप्तप्राग्ज्योतिषवर्द्ध-

मानवाजिमुखाम्बष्ठपुरुषादकर्णिकोष्ठाधिश्रोत्रव्याघ्रमुखलौहित्यार्णवक्षीरोदार्णवमीना-शनकिरातसौवीरमहीधराविवसनैक-पादोदयानुवासिनश्चेति।।

अथाग्नेय्यां दिशि देशान् जनपदांश्चाह-

**किष्किन्धकण्टकस्थलनिषादराष्ट्राणि पुरिकदाशार्णाः।**

**सह नग्नपर्णशबरैराश्लेषाद्ये त्रिके देशाः।।८,९, १०।।**

आग्नेय्यां पूर्वदक्षिणस्यां दिशि देशप्रविभागः। तद्यथा- कोशला जनाः। कलिङ्गाः। वङ्गाः। उपवङ्गाः। जठराङ्गाः। शूलिकाः। विदर्भाः। वत्साः। अन्ध्राः। चेदिकाश्च। ऊर्ध्वकण्ठाश्च।

वृषः वृषस्थानम्। नालिकेरः चर्मद्वीपः। विन्ध्यान्तवासिनः। विन्ध्यपर्वते ये निवसन्ति। त्रिपुरी नगरी। श्मश्रुधरा जनाः। हेमकुडयं स्थानम्। व्यालग्रीवा जनाः। महाग्रीवाः।

किष्किन्धो देशः। कण्टकस्थलम्। निषादराष्ट्राम्। पुरिकाः। दाशाणां। नग्नशबराः। पर्णशबराः। एते प्रागुक्ताः सह नग्नपर्णशबरैः। एते देशा आश्लेषाद्ये नक्षत्रत्रिके ज्ञेयाः। तथा च पराशरः।

**कर्णाटमहाटविचित्रकूटनासिक्यकोल्लगिरिचोलाः।**
**क्रौञ्चद्वीपजटाधरकावेर्यो ऋष्यमूकश्च।।११,१२, १३।।**

**वैदूर्यशङ्खमुक्तात्रिवारिचरधर्मपट्टनद्वीपाः।**

**गणराज्यकृष्णवेल्लूरपिशिकशूर्पाद्रिकुसुमनगाः।।१४।।**

**बलदेवपट्टनं दण्डकावनतिमिङ्गिलाशना भद्राः।**

**कच्छोऽथ कुञ्जरदरी सताम्रपर्णीति विज्ञेयाः।।१५, १६।।**

वलदेवपट्टनम्। दण्डकावनम्। तिमिङ्गिलाशनाः। भद्राः कच्छः। अथानन्तरम्। कुञ्जदरी हस्तिखण्डा। सताम्रपर्णी ताम्रपर्ण्या नद्या सहिता। इत्येवं प्रकारा देशा उत्तरफल्गुन्याद्ये त्रिके विज्ञेया ज्ञातव्याः।

अथ नैर्ऋत्यां दिशि देशप्रविभागमाह-

**हेमगिरिसिन्धुकालकरैवतकसुराष्ट्राबादरद्रविडाः।**

**स्वात्याद्ये भत्रितये ज्ञेयश्च महार्णवोऽत्रैव।।१७,१८, १९।।**

नैर्ऋत्यां दक्षिणपश्चिमायां दिशि देशाः। तद्यथा - पह्लवाः। काम्बोजाः। सिन्धुसौवीराः। वडवामुखाः। अरवाः। अम्बष्ठाः। कपिलाः। नारीमुखाः। आनर्ताः।

फेणगिरिः। यवनाः। मार्गराः। कर्णप्रावेयाः। पारशवाः। शूद्राः। बर्बरा। किराताः। खण्डाः। क्रव्यादाः। आभीराः। चञ्चूकाः।

हेमगिरिः। सिन्धुर्नदः। कालकाः। रैवतकाः। सुराष्ट्राः। बादराः। द्रविडाः। अत्रैव नैर्ऋत्यां दिशि महार्णवो ज्ञेयो ज्ञातव्यः। एते स्वात्याद्ये भत्रितये स्वातिपूर्वके नक्षत्रत्रितये ज्ञेयाः। तथा च पराशरः ।। बृ.सं.,पृ-२६२

अथ पश्चिमायां दिशि देशान् जनपदांश्चाह-

**अपरस्यां मणिमान् मेघवान् वनौघः क्षुरार्पणोऽस्तगिरिः।**
**अपरान्तकशान्तिकहैहयप्रशस्ताद्रिवोक्काणाः।।२०।।**

**पञ्चनदरमठपारततारक्षितिजृङ्गवैश्यकनकशकाः।**
**निर्मर्यादा म्लेच्छा ये पश्चिमदिक्स्थितास्ते च।।२१।।**

**दिशि पश्चिमोत्तरस्यां माण्डव्यतुषारतालहलमद्राः।**
**अश्मककुलूतहलडाः स्त्रीराज्यनृसिंहवनखस्था।।२२।।**

**वेणुमती फल्गुलुका गुलुहा मरुकुच्चर्मरङ्गाख्याः।**
**एकविलोचनशूलिकदीर्घग्रीवास्यकेशाश्च।।२३।।**

**कैकयवसातियामुनभोगप्रस्थार्जुनायनाग्नीध्राः।**
**आदर्शान्तद्वीपित्रिगर्ततुरगाननाः श्वमुखाः।।२४, २५।।**
**गान्धारयशोवतिहेमतालराजन्यखचरगाव्याश्च।**
**यौधेयदासमेयाः श्यामाकाः क्षेमधूर्ताश्च।।२६,२७,२८।।**

**ब्रह्मपुरदार्वडामरवनराज्यकिरातचीनकौणिन्दाः।**
**भल्लाः पटोलजटासुरकुनटखसघोषकुचिकाख्याः।।२९, ३०।।**
**एकचरणानुविद्धाः सुवर्णभूर्वसुधनं दिविष्ठाश्च।**
**पौरवचीरनिवासित्रिनेत्रमुञ्जाद्रिगान्धर्वाः।।३१।।**

ऐशान्यां दिशि देशाः। तद्यथा- मेरुकः। नष्टराज्यम्। पशुपालाः। कीराः। काश्मीराः। अभिसाराः। दरदाः। तङ्गणाः। कुलूतदेशाः। सैरन्ध्रिः। वनराष्ट्राः।

ब्रह्मपुरम्। दार्वाः। डामराः। वनराज्यम्। किराताः। चीनाः। कौणिन्दाः। भल्लाः। पटोलदेशाः। जटासुराः। कुनटाः। खसाः। घोषाः। कुचिकाख्याः।

एकचरणाः। अनुविद्धाः। सुवर्णभूः। वसुधनम्। दिविष्ठाश्च। पौरवाः। चीरनिवासिनः। त्रिनेत्राः। मुञ्जाद्रिः। गान्धर्वाः। एते रेवत्याद्ये त्रिके देशाः। पराशरः **बृ.सं.,पृ-२६५**

कृत्तिकाधैः प्रयोजनमाह-

**वर्गैराग्नेयाद्यैः क्रूरग्रहपीडितैः क्रमेण नृपाः।**

**पाञ्चालो मागधिकः कालिङ्गश्च क्षयं यान्ति।।३२।।**

**आवन्तोऽथानर्तो मृत्युं चायाति सिन्धुसौवीरः।**

**राजा च हारहौरो मद्रेशोऽन्यश्च कौणिन्दाः।।३३।।**

## २. नक्षत्रव्यूहाध्यायः

कस्मिन्नक्षत्रे के पदार्था आश्रिता इत्येतद्यत्र निरूप्यते स नक्षत्रव्यूहः। तत्रादावेव कृत्तिकायामाह-

**आग्नेये सितकुसुमाहिताग्निमन्त्रज्ञसूत्रभाष्यज्ञाः ।**
**आकारिकनापितद्विजघटकारपुरोहिताब्दज्ञाः।।१ ।।**

सितकुसुमानि श्वेतपुष्पाणि। आहिणाग्निराहित आरोपितोऽग्निर्येन अग्नित्रयोपचाराकाः। मन्त्रज्ञा मन्त्रविदाः। एवं सूत्रज्ञा यज्ञशास्त्रविदः। भाष्यज्ञा वैयाकरणाः। आकरः अर्थोत्पत्ति-स्थानम् तत्र नियुक्त आकरिकः। नापितः श्मश्रुकर्मकरः। द्विजो ब्राह्मणः। घटकारः कुम्भकारः। पुरोहितः पुरोधाः। अब्दज्ञो ज्यौतिषिकः। एते आग्नेये कृत्तिकायां समाश्रिताः।

**रोहिण्यां सुव्रतपण्यभूपधनियोगयुक्तशाकटिकाः।**
**गोवृषजलचरकर्षकशिलौच्चयैश्वर्यसम्पन्नाः ।।२ ।।**

सुव्रताः शोभनव्रताः। पण्याः पण्यवृत्तयः। भूपा राजानः। धनिनः। योगयुक्ता योगरताः। शाकटिकाः शकटजीविनः। गावः। वृषा दान्ताः। जलचराः प्राणिनः। कर्षकाः कृषिकराः। शिलोच्चयाः पर्वताः। ऐश्वर्यसम्पन्ना ऐश्वर्ययुक्ताः। एते रोहिण्यामाश्रिताः।।

**मृगशिरसि सुरभिवस्त्राब्जकुसुमफलरत्नवनचरविहंगाः।**
**मृगसोमपीथिगान्धर्वकामुका लेखहराश्च ।।३ ।।**

सुरभीणि सुगन्धद्रव्याणि। वस्त्राण्यम्बराणि। अब्जं यत्किञ्चिज्जलोद्भवम्। कुसुमानि पुष्पाणि। फलानि प्रसिद्धान्याम्रादीनि। रत्नानीन्द्रनीलप्रभृतीनि। वनचरा वनवासिनः। विहङ्गाः पक्षिणः। मृगा अरण्यप्राणिनः। सोमपीथयः सोमपाः। गान्धर्वा गेयज्ञाः। कामुकाः कामिनः। लेखहारा लेखवाहाः। एते सर्व एव मृगशिरिसि।

**रौद्रे वधबन्धानृतपरदारस्तेयशाठ्यभेदरताः ।**
**तुषधान्यतीक्ष्णमन्त्राभिचारवेतालकर्मज्ञाः।।४ ।।**

वधरता घातकाः। बन्धरताः प्राणिनां ये बन्धं कुर्वन्ति। अनृतरता असत्यभाषिणः। परदाररताः परस्त्रीषु सक्तः। स्तेयरताश्चौराः। शठाः परकार्यविमुखाः। तथा चोक्तम्-

मनसा वचसा यश्च दृश्यतेऽकार्यतत्पराः।
कर्मणा विपरीतश्च स शठः सद्भिरिष्यते।।

तस्य भावः शाठयम्। तत्र ये रताः। एकीभूतानां पदार्थानां पृथक्करणं भेदाः। तत्र ये राताः। तुषधान्यं शालयः। तीक्ष्णाः क्रूराः। मन्त्रज्ञा मन्त्रविदः। अभिचारज्ञा वशीकरणादिकर्मविदः। वेतालकर्मज्ञा वेतालोत्थापनविद्यास्वभिज्ञाः। एते सर्वे रौद्रे आर्द्रायाम्।

अथ पुनर्वसावाह-

**आदित्ये सत्यौदार्यशौचकुलरूपधीयशोऽर्थयुताः।**
**उत्तमधान्यं वणिजः सेवाभिरताः सशिल्पिजनाः।।५।।**

**पुष्ये यवगोधूमाः शालीक्षुवनानि मन्त्रिणो भूपाः।**
**सलिलोपजीविनः साधवश्च यथेष्टिसक्तश्च ।।६।।**

यवाः। गोधूमाः। शालयो धान्यानि। इक्षवः। वनान्यरण्यानि। मन्त्रिणः सचिवाः। भूपा राजानः। सलिलोपजीविनः सलिलं जलं तेनोपजीवन्ति तेनैवार्जनं ये कुर्वन्ति धीवरप्रायाः। साधवश्च सज्जनाः। यज्ञसक्ता यागेष्वनुरक्ताः। इष्टयः पुत्रकाम्यादयः तासु च ये सक्ता निरताः। एते सर्व एव पुष्ये।

अथाऽऽश्लेषायामाह-

**अहिदेवे कृत्रिमकन्दमूलफलकीटपन्नगविषाणि ।**
**परधनहरणाभिरतास्तुषधान्यं सर्वभिषजश्च ।।७।।**

**पित्र्ये धनधान्याढ्याः कोष्ठागाराणि पर्वताश्रयिणः।**
**पितृभक्तवणिक्शूराः क्रव्यादाः स्त्रीद्विषो मनुजाः ।।८।।**

**प्राक्फल्गुनीषु नटयुवतिसुभग गान्धर्वशिल्पिपण्यानि।**
**कार्पासलवणमाक्षिकतैलानि कुमारकाश्चापि ।।९।।**

**आर्यम्णेमार्दवशौचविनयपाषण्डिदानशास्त्ररताः।**
**शोभनधान्यमहाधनधर्मानुरताः समनुजेन्द्रः।।१०।।**

मार्दवरता मृदुभावसमेताः। शौचरताः शुद्धाः परधनादिष्वलुब्धाः। विनयरता नीतिज्ञाः। पाखण्डिनो वेदबाह्यास्तेषु ये राताः सक्ताः। दानरता दानसक्ताः। शास्त्ररता :

पठनशीलाः। शोभनं धान्यं कलमशाल्यादि। महाधना अतिधननिः। कर्मानुरताः कर्मस्वतिसक्ताः। ते च समनुजेन्द्रा मनुजेन्द्रैर्नृपैः सहिताः। एते सर्व एवाऽऽर्यम्णे उत्तरफल्गुन्याम्।

अथ हस्तम् आह-

**हस्ते तस्करकुञ्जररथिकमहामात्रशिल्पिपण्यानि।**
**तुषधान्यं श्रुतयुक्ता वणिजस्तेजोयुताश्चात्र।।११।।**

तस्कराश्चौराः। कुञ्जरा हस्तिनः। रथिका रथेन गन्त्र्यादिना ये गच्छन्ति। महामात्रा हस्तिसाधनपतयः। शिल्पिनश्चित्रकारप्रभृतयः। पण्यं यत्किञ्चिद्विक्रयद्रव्यम्। तुषधान्यं शालयः। श्रुतयुक्ताः श्रुताभिनिरताः। वणिजः क्रयविक्रयनिरताः। तेजोयुतास्तेजस्विनः। अत्रास्मिन् हस्ते सर्व एवैते।

अथ चित्रायामाह-

**त्वाष्ट्रे भूषणमणिरागलेख्यगान्धर्वगन्धयुक्तिज्ञाः।**
**गणितपटुतन्तुवायाः शालाक्या राजधान्यानि ।।१२।।**

**स्वातौ खगमृगतुरगा वणिजो धान्यानि वातबहुलानि ।**
**अस्थिरसैहृदलघुसत्त्वतापसाः पण्यकुशलाश्च ।।१३।।**

**इन्द्राग्निदैवते रक्तपुष्पफलशाखिनः सतिलमुद्राः।**
**कार्पासमाषचणकाः पुरन्दरहुताशभक्तश्च ।।१४।।**

**मैत्रे शौर्यसमेता गणनायकसाधुगोष्टियानरताः।**
**ये साधवश्च लोके सर्वे च शरत्समुत्पन्नम् ।।१५।।**

शौर्यसमेता बलसंयुक्ताः। गणनायका गणप्रधानाः। साधूनां ये रताः। गोष्ठिरता नर्मसक्ताः। यानरता वाहनसक्ता गमनसक्ता वा। ये च लोके जनपदे साधवः सज्जनाः। शरत्समुत्पन्नं शारदं सर्वमशेषं पत्किञ्चिद्धान्यादि। एतन्मैत्रेऽनुराधायाम्।

अथ ज्येष्ठायमाह-

**पौरन्दरेऽतिशूराः कुलवित्त्यशोऽन्विताः परस्वहृतः।**
**विजिगीषवो नरेन्द्राः सेनानां चापि नेतारः।।१६।।**

**मूले भेषजभिषजो गणमुख्याः कुसुममूलफलवार्त्ताः।**

**बीजान्यतिधनयुक्ताः फलमूलैर्येच वर्त्तन्ते।।१७।।**

**आप्ये मृदवो जलमार्गगामिनः सत्यशौचधनयुक्ताः।**

**सेतुकरवारिजीवकफलकुसुमान्यम्बुजातानि।।१८।।**

**विश्वेश्वरे महामात्रमल्लकारितुरगदेवताभक्ताः ।**

**स्थावरयोधाभोगान्विताश्चये चौजसा युक्ताः ।।१९।।**

महामात्रा हस्तिसाधनपतयः। मल्ला बाहुयुद्धज्ञाः। करिणो हस्तिनः। तुरगा अश्वाः। देवतासक्ता देवताभक्ताः। स्थावरा वृक्षादयः। योधा युद्धकुशलाः। भोगान्विता भोगसमेताः। ये च जनास्तेजसा युक्तास्तेजस्विनः। ते सर्व एव विश्वेश्वर उत्तराषाढायाम्।

अथ श्रवण आह-

**श्रवणे मायापटवोनित्योद्युक्ताश्च कर्मसु समर्थाः।**

**उत्साहिनः सघर्मा भागवताः सत्यवचनाश्च ।।२०।।**

मायापटवो मायाविनः प्रपञ्चकुशलाः नित्योद्युक्ताः सर्वकालं सोद्यमाः कर्मसु व्यापारेषु समर्थाः सक्ताः। उत्साहिनः सोत्साहाः। सघर्मा धर्मसंयुक्ताः। भागवता भगवद्भक्ताः। सत्य वचनाः सत्यभाषिणः। एते सर्व एव श्रवणे।

अथ धनिष्ठायमाह-

**वसुभे मानोन्मुक्तोः क्लीबाश्चलसौहृदाः स्त्रियां द्वेष्याः।**

**दानाभिरता बहुवित्तसं युताः शमपराश्च नराः।।२१।।**

मानोन्मुक्ता मानवर्जिता निरहङ्काराः। क्लीबाः षण्ढाः अचलसौहृदाः स्थिरमैत्राः। स्त्रियां द्वेष्यां स्त्रीष्वप्रियाः। दानाभिरता दानशीलाः। बहुवित्तसंयुताः पंभूतधनान्विताः। ये च नरा मनुष्याः शमपरा जितेन्द्रियाः। एते सर्व एव वसुभे धनिष्ठायाम्।

अथ शतभिषज्याह-

**वरूणेशे पाशिकमत्स्यबन्धजलजानि जलचरा जीवाः।**

**सौकरिकरजकशौण्डिकशाकुनिकाश्चापि वर्गेऽस्मिन् ।।२२।।**

**आजे तस्करपशुपालहिंस्रकीनाशनीचशठचेष्टाः ।**

**धर्मव्रतैर्विरहिता नियुद्धकुशलाश्च मनुजाः ।।२३।।**

**आहिर्बुध्न्ये विप्राः क्रतुदानतपोयुता महाविभवाः।**

**आश्रमिणः पाषण्डा नरेश्वराः सारधान्यं च।।२४।।**

विप्रा द्विजाः। क्रतुर्यज्ञः। दानं सत्पात्रेष्वर्थप्रतिपादनम्। तपो व्रतानुसेवनम्। एतैर्ये युताः समन्विताः। महाविभवा अत्यैश्वर्ययुक्ताः। आश्रमिणश्चतुर्थाश्रमिणः। पाखण्डा वेदबाह्याः। नरेश्वराः राजानः। सारधान्यं श्रेष्ठाः शालयः। एतत्सर्वमेवाहिर्बुध्न्ये उत्तरभद्रपदायाम्।

अथ रेवत्यामाह-

**पौष्णे सलिलजफलकुसुमलवणमणिशंखमौक्तिकाब्जानि ।**

**सुरभिकुसुमानि गन्धा वणिजो नौकर्णधाराश्च।।२५।।**

सलिलजानि जलोद्भवानि यानि द्रव्याणि मृणालादीनि यानि च फलानि। तथा कुसुमानि पुष्पाणि। लवणं सैन्धवम्। मणयो रत्नानि। शङ्खः प्रसिद्धः। मौक्तिकं मुक्ताफलानि। अब्जानि पद्मप्रभुतीनि। सुरभि सुगन्धद्रव्यम्। कुसुमानि। अथवा सुरभीणि सुगन्धानि कुसुमानि। गन्धाः सुगन्धद्रव्याणि। वणिजः क्रयविक्रयिणः। नौकर्णधारा नाविकाः। एते सर्व एव पौष्णे रेवत्याम्।

अथाश्विन्यामाह-

**अश्विन्यामश्वहराः सेनापतिवैद्यसेवकास्तुरगाः ।**

**तुरगारोहाश्च वणिग्रूपोपेतास्तुरगरक्षाः।।२६।।**

अश्वहरा अश्वग्राहकाः। सेनापतयश्चमूनाथाः। वैद्याः कार्यचिकित्सकाः। सेवकाः सेवानिरताः। तुरगा अश्वाः। तुरगारोहा अश्वगामिनः। वणिजः किराताः क्रयविक्रयनिरताः रूपोपेताः रूपसम्पन्नाः सुरूपाः। तुरगरक्षा अश्वपतयः। एते सर्व एवाऽश्विन्याम्।

अथ भरण्यामाह-

**याम्येऽसृक्पिशितभुजः क्रूरा वधबन्धताडनासक्ताः ।**

**तुषधान्यं नीचकुलोद्भवा विहीनाश्च सत्त्वेन।।२७।।**

असृग्रक्तं पिशितं मांसें तद्भुञ्जते ये तेऽसृक्पिशितभुजो रक्तमांसादाः। क्रूराः उग्राः। वधे मारणे बन्धे बन्धने ताडने कुट्टने चासक्ता रताः। तुषधान्यं शालयः।

नीचकुलोद्भवा निकृष्टवंशजाताः। ये च सत्त्वेनौदार्येण विहिना रहिताः। एते सर्व एव याम्ये भरण्याम्।

अधुना जातिनक्षत्राण्याह-

**पूर्वात्रयं सानलमग्रजानां राज्ञां तु पुष्येण सहोत्तराणि ।**

**सपौष्णमैत्रं पितृदैवतं च प्रजापतेर्भं च कृषीवलानाम् ।।२८,२९।।**

**सौम्येन्द्रचित्रावसुदैवतानि सेवाजनस्वाम्यमुपागतानि।**

**सर्पा विशाखा श्रवणो भरण्यश्चण्डालजातेरिति निर्दिशन्ति।।३०।।**

**रविरविसुतभोगमागतं क्षितिसुतभेदनवक्रदूषितम् ।**

**ग्रहणगतमथोल्कया हतं नियतमुषाकरपीडितं च यत्।।३१।।**

**तदुपहतमिति प्रचक्षते प्रकृतिविपर्ययातमेव वा ।**

**निगदितपरिवर्गदूषणं कथितविपर्ययगं समृद्धये।।३२।।**

रविरादित्यः। रविसुतः शनैश्चरः। अनयोरेकस्य यन्नक्षत्रं भोगमागतं भोगं प्राप्तम्। क्षितिसुतो भौमस्तद्भेदनेन मध्यगमनेनाच्छादनेन वा तद्वक्रेण वा दूषितं दुष्टम्। ग्रहणगतं यन्नक्षत्रं यत्र स्थितोऽर्कश्चन्द्रो वा राहुणा ग्रस्यते तदंग्रहणगतम्। अथोल्कया हतमुल्कानिपीडितम्। नियतं सर्वकालमुषाकरेण चन्द्रेण यत्पीडितम। यस्य नक्षत्रस्यं चन्द्रमा योगतारकाभेदेन आच्छादनं मध्यगमनं दक्षिणभागगमनं वा करोति तदुषाकरपीडितम्।

तदुपहतमिति प्रचक्षत इति। एवंविधं यन्नक्षत्रं तदुपहतमिति प्रचक्षते कथयन्ति मुनयः। अथवा प्रकृतेः स्वभावाद्विपर्ययं विपरीतं यातं प्राप्तं तदप्युपहतम्। एवंविधिं नक्षत्रं निगदितस्य कथितस्य परिवर्गस्य प्रागुक्तस्य दूषणं दुष्टतां विनाशं करोति। कथितविपर्ययगं समृद्धये। रविरविसुतमागतमित्यादि यदुक्तं तद्विपरीतगं यन्नक्षत्रं तत्कथितस्योक्तस्य परिवर्गस्य समृद्धये भवति पुष्णातीत्यर्थः।

## ३. ग्रहभक्तियोगाध्यायः

कस्मिन् देशे जनानां को ग्रहाऽधिपतिरित्येतद्यत्र निरूप्यते। तत्रादावेवाऽऽदित्यस्याह-

**चम्पोदुम्बरकौशाम्बीचेदिविन्ध्याटवीकलिङ्गाश्च।**

**पुण्ड्रा गोलांगूलश्रीपर्वतवर्द्धमानाश्च।।१, २, ३।।**

**इक्षुमतीत्यथ तस्करपारतकान्तारगोपबीजानाम्।**

**तुषधान्यकटुकतरुकनकदहनविषसमरशूराणाम्।।४।।**

**भेषजभिषक्चतुष्पदकृषिकरनृपर्हिस्त्रयायिचौराणाम्।**

**व्यालारण्ययशोयुततीक्ष्णानां भास्करः स्वामी।।५।।**

नर्मदानाम्नी नदी तस्याः प्रागर्द्धः पूर्वभागः। शोणो नदः। उड्रा जनाः। वङ्गाः। सुह्याः। कलिङ्गः। वाह्लीकाः। शकाः। पवनाः। मगधाः। शबराः। प्राग्ज्योतिषाः। चीनाः। काम्बोजाः।

मेकलाः। किराताः। विटकाः। बहिरन्तः शैलजाः। शैलाः पर्वतास्तत्र ये बहिः बाह्यभागे जाताः समवस्थिताः, अन्त पर्वतमध्ये ये जाताः। पुलिन्दा जनाः। चशब्दः सर्वत्र समुच्चये। तथा द्रविडाना जनानां प्रागर्द्ध पूर्वार्द्धम्। यमुना कालिन्दी नदी तस्या दक्षिण कूलम्।

चम्पो देशः। उदुम्बरः। कौशाम्बी नगरी। चेदयो जनाः। विन्ध्याटवी विन्ध्यमध्यम्। कलिङ्गाः। पुण्ड्रा जनाः। गोलाङ्गलाः। श्रीपर्वतः। वर्द्धमानम्।

इक्षुमतीनान्मी नदी। इतिशब्दः प्रकारे। अथानन्तरम्। तस्करो देशो जना वा। पारता जनाः। कान्तारमटवी। गोपा गोपालकाः। बीजानि प्रसिद्धानि। तुषधान्यं शालयः। कटुकं द्रव्यं मरीचादि। तरवो वृक्षाः। कनकं सुवर्णम् दहनोऽग्निः। विषं महौषधम्। समरशूराः संग्रामवीराः।

भेषजमौषधम्। भिषजो वैद्याः। चतुष्पादाः पशवः। कृषिकराः कर्षकाः। नृपा राजानः। हिंस्त्राः पापाः। यायिनो विजिगमिषवः। चौरास्तस्कराः। व्यालाः सर्पाः। अरण्यं निर्जनो देशः। यशोयुता यशस्विनः। तीक्ष्णं निम्बादि, तीक्ष्णा वा जनाः। एषां सर्वेषां भास्कर आदित्यः स्वामी प्रभुरिति। तथा च काश्यपः-

अथ चन्द्रस्याह-

**मधुररसकुसुमफलसलिललवणमशिंखमौक्तिकाब्जानाम्।**

**शालियवौषधिगोधूमसोमपाक्रन्दविप्राणाम्।।६, ७।।**

**सितसुभगतुरगरतिकरयुवतिचमूनाथभोज्यवस्त्राणाम्।**

**भृङ्गिनिशाचरकर्षकयज्ञविदांचाधिपश्चन्द्रः।।८।।**

गिरिदुर्गं पर्वतदुर्गम्। सलिलदुर्गं जलदुर्गम्। कोशला जनाः। भरुकच्छाः। समुद्राः सागराः। रोमकाः। तुषाराः। वनवासिनः। तङ्गणाः। हलाः। स्त्रीराज्यम् महार्णवद्वीपा वडवामुखद्वीपाः।

मधुररसं यत्किञ्चित् कुसुमानि फलानि सर्वाणि। सलिलं जलम्। लवणं सैन्धवम्। मणयः। शङ्खः। मौक्तिकम्। अब्जाः सलिलसम्भवाः पद्मप्रभृतयः। शालयो धान्यानि। यवाः। औषधयः। गोधूमाः। सोमपा याज्ञिकाः। आक्रन्दः पार्ष्णिग्राहन्तरितो राजा। विप्रा ब्राह्मणाः।

सितं श्वेतवर्णं यत्किञ्चित् रूप्यं वा। सुभगाः सर्वजनप्रियाः। तुरगा अश्वाः। रतिकराः कामिनः। युवतयः स्त्रियः। चमूनाथाः सेनापतयः। भोज्यं प्रसिद्धम्। वस्त्राण्यम्बराणि। श्रृङ्गिणः प्रसिद्धाः प्राणिनः। निशाचरा रात्रिचराः। कार्षकाः कृषिकाराः। यज्ञविदो यज्ञसूत्रज्ञाः। एतेषां चाधिपश्चन्द्रः शशी। तथा च काश्यपः। बृ.सं,पृ-२८०

अथ भौमस्याह-

**शोणस्य नर्मदाया भीमरथायाश्च पश्चिमार्द्धस्थाः।**

**निर्विन्ध्या वेत्रवती शिप्रा गोदावरी वेणा।।९,१०,११।।**

**(नासिक्यभोगवर्द्धनविराटविन्ध्याद्रिपार्श्वगा देशाः।**

**ये च पिबन्ति सुतोयां तार्पीं ये चापि गोमतीसलिलम्।।**

**नागरकृषिकरपारतहुताशना जीविशस्त्रवार्त्तानाम्।**

**आटविकदुर्गकर्वटवधकनृशंसावालिप्तानाम्।।१२,१३,१४।।**

**उदपानयन्त्रगान्धर्वलेखमणिरागगन्धयुक्तिविदः।**

**आलेख्यशब्दगणितप्रसाधकायुष्यशिल्पज्ञाः।।१५, १६, १७।।**

**आरक्षकटनर्तकघृततैलस्नेहबीजतिक्तानि।**

**व्रतचारिरसायनकुशलवेसराश्चन्द्रपुत्रस्य।।१८, १९।।**

लोहित्यो नदः। सिन्धुनदश्च। सरयूर्नदी गाम्भीरिका रथाख्या च। गङ्गा जाह्नवी। कौशिकी। आदिग्रहणाद्विपाशा सरस्वती चन्द्रभागा च ज्ञेया। एताः सरितो नद्यः। वैदेहा जनाः। काम्बोजा जनाः।

मथुरायाः पूर्वमर्द्धम्। हिमवान् पर्वतः। गोमन्तो गोमिनः पर्वतो वा। चित्रकूटश्च पर्वतः। एतेषु ये स्थिता जनाः। सौराष्ट्रा जनाः। सेत्वाश्रयिणः सेतुगामिनः। जलमार्गश्रयिणो जलमार्गेण ये गच्छन्ति। पण्याश्रयिणः पण्यवृत्तयः। बिलाश्रयिणो बिलनिवासिनः। पर्वताश्रयिणः पर्वतवासिनः।

आरक्षको रक्षाधिकृतः। नटाः प्रसिद्धाः। नर्तको नर्तनं शिल्पमस्य स नर्तकः। घृतमाज्यम्। तैलं प्रसिद्धम्। स्नेहस्तिलाक्षोटादि बीजानि प्रसिद्धानि। तिक्तं निम्बादि। व्रतचारिणो ब्रह्मचारिप्रभृतयः। रसायनकुशला रसायनसाधने शक्ताः। वेसरा अश्वविशेषाः। एते सर्वे चन्द्रपुत्रस्य बुधस्य। तथा च काश्यपः- **बृ.सं,पृ-२८३**

अथ गुरोराह-

**सिन्धुनदपूर्वभागो मथुरापश्चार्धभरतसौवीराः।**

**स्त्रुगन्घोदीच्याविपाशासरिच्छतद्रुरमठसाल्वाः।।२०,२१,२२।।**

**शैलेयकमांसीतगरकुष्टरससैन्धवानि वल्लीजम्।**

**मधुररसमधूच्छिष्टानि चौरकश्चेति जीवस्य।।२३, २४।।**

शैलेयं सुगन्धिद्रव्यम्। कुष्ठम। मांसीतगरम्। रसं वोलम्। सैन्धवं लवणम्। वल्लीजं मुद्गाणि। मधुरा ये च रसाः। मधूच्छिष्टं सिक्थकम्। चोरकं सुगन्धद्रव्यम्। एते सर्व एव जीवस्य गुरोः। तथा च काश्यपः- **बृ.सं,पृ-२८५**

अथ शुक्रस्याह-

**सुरभिकुसुमानुलेपनमणिवज्रविभूषणाम्बुरुहुशय्याः।**

**वरतरुणयुवतिकामोपकरणमृष्टान्नमधुरभुजः।।२५, २६, २७।।**

**कौशेयपट्टकम्बलपत्रोर्णिकरोघ्रपत्रचोचानि।**

**जातीफलागुरुवचापिप्पल्यश्चन्दनं च भृगोः।।२८, २९।।**

कौशयपट्टो लोके नेत्रपट्ट इति प्रसिद्धः। कम्बल और्णिकः। पत्रौर्णिक धौतकौशेयम्। रोध्रं प्रसिद्धं सुगन्धद्रव्यम्। पत्रं सुगन्धपत्रम्। चोचं मलिनपत्रं नारिकेलं च। जातीफलं प्रसिद्धम्। अगुरु सुगन्धद्रव्यम्। वचा प्रसिद्धा। पिप्पल्यः कणाः। चन्दनं मलयजम्।। एतद् भृगोः शुक्रस्य। तथा च काश्यपः। **बृ.सं,पृ-२८६**

अथ शनैश्चरस्याह-

**कटुतिक्तरसायनविधवयोषितो भुजगतस्करमहिष्यः।**

**खरकरभचणकवातुलनिष्पावाश्चार्कपुत्रस्य।।३०,३१, ३२, ३३।।**

आनर्ता जनाः। आर्बुदाः। पुष्कराः। सौराष्ट्राः। आभीराः। शूद्राः। रैवतकाः। यस्मिन् देशे सरस्वती नष्टा अदर्शनं गता। स पश्चिमो देशः।।

कटुद्रव्यं मरीचादि। तिक्तं निम्बादि। रसायनं प्रसिद्धम्। विधवयोषितो भर्तृहीनाः स्त्रियः। भुजगाः सर्पाः। तस्कराश्चौराः। महिष्यः प्रसिद्धाः। खराः गर्दभाः। करभा उष्ट्राः। चणकाः प्रसिद्धाः। वातला राजमाषप्रभृतयः। निष्पावाः शालयः। एते सर्व एव अर्कपुत्रस्य शनैश्चरस्य तथा। तथा च काश्यपः- **बृ.सं,पृ-२८८**

**उपहतदाम्भिकराक्षसनिद्राबहुलाश्च जन्तवः सर्वे।**

**धर्मेण च सन्त्यक्तामाषतिलाश्चार्कशशिशत्रोः।।३४, ३५, ३६।।**

गिरिशिखरेषु पर्वतश्रृङ्गेषु। कन्दरेषु गिरिखातासु नीचस्थानेषु। दरीषु गुहासु च ये विनिविष्टाः स्थिता म्लेच्छजातय एकवर्णाः। शूद्राः गोमायुभक्षाः श्रृगालादाः। शूलिका जनाः। वोक्काणाः। अश्वमुखाः। विकलाङ्गा अङ्गहीनाः।

कुलपांसनाः कुलकलङ्ककारिणः। हिंस्त्राः क्रूराः। कृतध्ना अनुपकारशीलाः। चौरास्तस्कराः। निःस्त्याः सत्यरहिताः। निःशौचाः शौचरहिताः। निर्दानाः कदर्याः। खरा गर्दभाः। चराश्चरपुरुषा ः। नियुद्धविदो बाहुयुद्धज्ञाः। तीव्ररोषा अतिक्रोधिनः। गर्ताश्रया गर्तस्थाः। नीचा अधमकर्मकराः।

उपहताः कुत्सिताः। दाम्भिका मिथ्याधर्मिणः। राक्षसा रक्षोजातयः। ये च निद्राबहुलाः सर्व एव जन्तवः। धर्मेण च सन्त्यका रहिताः। तथा माषतिलाः। एते सर्वे अर्कशशिशत्रो राहोः। तथा च काश्यपः- **बृ.सं,पृ-२८९**

अथ केतोराह

**परादरविवादरताः परन्ध्रकुतूहला मदोत्सिक्ताः।**

**मूर्खा धार्मिकविजिगीषवश्च केतोः समाख्याताः।।३७, ३८।।**

गिरिदुर्गः पर्वतदुर्गः। पह्लवा जनाः। श्वेताः। हूणाः। चोलाः। आवगाणाः। मरुभू। चीना। प्रयत्ना गह्वरवासिनः। धनिन ईश्वराः। महेच्छा विपुलाशाः। व्यवसायोपेता निपुणाः। पराक्रमोपेता बलिनः।

परदाररताः। विवादरताः। पररन्ध्रे कुतूहलो विस्मयो येषां ते पररन्ध्रकुतूहलाः। मदोत्सिक्ता मत्ताः। मुर्खा अज्ञाः। अधार्मिका धर्मरहिताः। विजिगीषवो विजेतुमिच्छवः। एते सर्व एव केतोः शिखिनः समाख्याता उक्ताः। तथा च काश्यपः- **बृ.सं,पृ-२८९**

अथैतेषां प्रयोजनमाह-

**उदयसमये यः स्निग्धांशुर्महान् प्रकृतिस्थितो**

**यदि च न हतो निर्घातोल्कारजो-ग्रहमर्दनैः।**

**स्वभवनगतः सोच्चप्राप्तः शुभग्रहवीक्षितः**

**स भवति शिवस्तेषां येषां प्रभुः परिकीर्तितः।।३९।।**

यो ग्रह उदयसमये क्षितिजात् प्रत्युद्गमकाले स्निग्धांशुर्निर्मलरश्मिर्दृश्यते। महान् विस्तीर्णबिम्बः। प्रकृतिस्थितः स्वभावस्थः। यदि वा निर्धातेन न हतो न चोल्कया न च रजसा न ग्रहयुद्धेन हतः। तथा यश्च स्वभवने स्वराशी गतः प्राप्तः। स्वोच्चे आत्मीयोच्चराशौ च प्राप्तः। शुभग्रहैः सौम्यग्रहैः शशिबुधजीवशुक्राणामन्यतमेन वीक्षितो दृष्टः स ग्रहो येषां प्रभुः स्वामी परिकीर्तित उक्तस्तेषां शिवः श्रेयस्करो भवति।

अन्यदप्याह-

**अभिहितविपरीतलक्षणैः क्षयमुपगच्छति तत्परिग्रहः।**

**डमरभयगदातुरा जना नरपतश्च भवन्ति दुःखिताः।।४०।।**

**यदि न रिपुकृतं भयं नृपाणां स्वसुतकृतं नियमादमात्यजं वा।**

**भवति जनपदस्य चाप्यवृष्ट्या गमनमपूर्वपुराद्रिनिम्नगासु।।४१।।**

## ४. ग्रहयुद्धाध्यायः

तत्रादावेवोपोद्धातमाह-

**युद्धं यथा यदा वा भविष्यमादिश्यते त्रिकालज्ञैः।**
**तद्विज्ञानं करणे मया कृतं सूर्यसिद्धान्ते।।१।।**

यदा यस्मिन् काले यथा वा येन प्रकारेण वा ताराग्रहाणां युद्धं जयपराजयं त्रिकाल-ज्ञैस्त्रिकालविद्धिरतीवर्तमानानागतकालज्ञैर्भविष्यं भावि यदादिश्यते कथ्यते तद्विज्ञानं तस्य ग्रहयुद्वस्य विज्ञानं यथा ज्ञायते तथा मया करणे पञ्चसिद्धान्तिकायां सूर्यसिद्धान्ते कृतमिति। केचित् सूर्यसिद्धान्तादिति पठन्ति। सूर्यसिद्धान्ताद् भगवद्रविप्रणीतात् सिद्धान्तादानीय कृतमिति।

अथ युद्धकारणमाह-

**वियति चरतां ग्रहाणामुपर्युपर्यात्ममार्गसंस्थानाम्।**
**अतिद्वराद् दृग्विषये समतामिव सम्प्रयातानाम्।।२।।**
**आसन्नक्रमयोगाद् भेदोल्लेखांशुमर्दनासव्यैः।**
**युद्धं चतुष्प्रकारं पराशराद्यैर्मुनिभिरुक्तम्।।३।।**

ग्रहाणां भौमादीनां वियत्याकाशे चरतां गच्छतामुपर्युपर्युर्ध्वाधः स्थित्या आत्मार्गे स्ववर्त्मनि प्रतिमण्डलवशेन संस्थितानां दृग्विषये दृष्टिगोचरे अतिदूरादत्यासन्ननिकृष्टत्वात् समतां तुल्यतामिव सम्प्रयातानां प्राप्तानाम्।

पाराशरादीनामेव यन्मतं तच्चाऽऽचार्यस्यापि स्वसिद्धान्ते येन स्थानस्थानेष्वाह-गर्गवसिष्ठपराशरमतमेतदिति। तथा च पराशरः- **बृ.सं,पृ-२९४**

भेदनमारोहणमुल्लेखनं रश्मिसंसर्गश्चेति ग्रहयुद्धं चतुर्विधमाचक्षते कुशलाः। तेषां पूर्वात् पूर्वो गरीयान्। तथा च गर्गः- **बृ.सं,पृ-२९४**

अथ चतुष्प्रकारस्य युद्धस्य प्रत्येकं फलमाह-

**भेदे वृष्टिविनाशो भेदः सुहृदां महाकुलानां च।**
**उल्लेखे शस्त्रभयं मन्त्रिविरोधः प्रियान्नत्वम्।।४।।**
**अंशुविरोधे युद्धानि भूभृतां शस्त्ररुक्क्षुदवमर्दाः।**
**युद्धे चाप्यपसव्ये भवन्ति युद्धानि भूपानाम्।।५।।**

भेदसंज्ञिते युद्धे वृष्टिविनाशोऽवर्षण भवति। सुहृदां मित्राणां महाकुलानां च प्रधानानां परस्परं भेदो भवति। उल्लेखे उल्लेखसंज्ञिते युद्धे शस्त्रभयं शस्त्राद्भयम्। मन्त्रिविरोधः सचिवविग्रहः। प्रियान्नत्वं दुर्भिक्षयमित्यर्थः।।

आचार्यार्यभटेन सव्यापसव्यं भूगतानां सत्त्वानामुक्तमतः कस्माद् ग्रहर्क्षाणामुक्तमप्युच्यते। मेरुमूलनिवासीनि यानि सत्त्वानि तानि मिथुनान्तगमप्यर्कं क्षितिजलेखासन्नमेव पश्यन्ति तथैव वडवामुखनिवासीनि। अत्रोक्तमेवाऽऽचार्येण -

तस्मात् क्षितिजलेखासन्नव्यवहारमेवाङ्गीकृत्याऽऽचार्याऽऽर्यभटेनोक्तम्।

सर्व एव शकुनादयो यातुर्वामपार्श्वादग्रत आगत्य दक्षिणपार्श्वेन क्रामन्ति यत्तत्प्रदक्षिणं सव्यं च। एतद्विपरीतं दक्षिणपार्श्वाद्वामपार्श्वगमनं यत्तदपसव्यमेष निश्चयः। वामेऽरिभयं जयः सव्ये तदुक्तं प्रदक्षिणेन जयः। आचार्येणेदं प्रदर्शितमेव प्रदक्षिणं तु यात्रायां जयदं नेष्टमन्यथा इति। वामेऽरिभयमिति सव्याद्यदन्यथा वामं विपरीतं ग्रहाणां सव्यापसव्यता। उत्तरदिक्स्थः प्रदक्षिणो दक्षिणादिक्स्थो जेता यदा तदा तदपसव्यमिति। नन्वमुक्तं कथमवगम्यते इदम् ? अत्रोच्यते – उक्तमेवेदम्। यतोऽनुलोमेन प्रतिलोमेन वा गत्या भेदेन ग्रहाणां फलं प्रतिभेदान्न प्रदर्शितम्। तत्र एकमेव फलं तथा चानुलोमगः प्रतिलोमगो वा दक्षिणेनोत्तरेण वोल्लेखं करोति। तत्राप्येकमेव फलम्। तथांशुविमर्दस्याप्यनुलोमेन प्रतिलोमेनापि फलस्याभेदः। एवं संस्थानत्रयं चैतद्यदंशुमर्दनस्य फलमपसव्यसंज्ञितस्य तदेव फलम् –

एतदुक्तं भवति–यस्य ग्रहस्योत्तरदिक्स्थस्य यत्फलमभिहितं तस्य ग्रहस्य दक्षिणदि-क्स्थस्याप-सव्यसंज्ञितस्य जयसंयुक्तस्य तदेव फलम्। तस्मादपसव्यनिर्देशो यः स नातिरिच्यत इति।।

**केतुकुजराहुशुक्रा यायिन एते हता ध्नन्ति।**
**आक्रन्दयायिपौरान् जयिनो जयदाः स्ववर्गस्थ।।६, ७।।**

केतुकुजराहुशुक्रा यायिनः। केतुः शिखी। कुजोऽङ्गारकः। राहुः सैंहिकेयः। शुक्रो भार्गवः। एते ग्रहा यायिनः। एत एव हता ध्नन्ति आक्रन्दयायिपौरान्। आक्रन्दयायिपौरा ग्रहा हताः पराजिता आक्रन्दयायिपौरान्नृपान् ध्वन्ति। एव एव जयिनः स्ववर्गस्यात्मीयवर्गस्य जयदा भवन्ति।

अत्रैव विशेषमाह-

**पौरे पौरेण हते पौराः पौरान् नृपान् विनिध्नन्ति।**
**एवं याय्याक्रन्दा नागरयोयिग्रहाश्चैव।।८।।**

पौरेण नागरेण ग्रहेण पौरे ग्रहे हते विजिते सति पौरा नृपाः पौरान् नृपानेव विनिध्वन्ति नाशयन्ति। एवमनेन प्रकारेण याय्याक्रन्दाः परस्परं विनिध्नन्ति। नागरयायिग्रहाश्चैवमपि जिताः परस्परं विनिध्नन्ति। तथा च पराशरः- **बृ.सं,पृ-२९८**

तेषां तज्जयाद्विजयो वधाद् वधोऽन्योन्यभेदाद्भेदः साम्यात् साम्यम्।

अथ जितलक्षणमाह-

**दक्षिणदिक्स्थः परुषो वेपगथुरप्राप्य सन्निवृत्तोऽणुः।**

**अधिरूढो विकृतो निष्प्रभो विवर्णश्च यः स जितः।।९।।**

दशभिर्लक्षणैर्ग्रहं जितं विन्द्यात् विवर्णः परुषः सूक्ष्मो याम्याशामार्गस्थोऽधिरूढो निष्प्रभो विकृतोऽभिहतोऽप्राप्य निवृत्तो वेपनश्च। अन्यथा विजयी। तथा च गर्गः- **बृ.सं,पृ-२९८**

अथ जयिनो लक्षणमाह-

**उक्तविपरीतलक्षणसम्पन्नो जयगतो विनिर्देश्यः।**

**विपुलः स्निग्धो द्युतिमान् दक्षिणदिक्स्थोऽपि जययुक्तः।।१०।।**

दक्षिणदिक्स्थः परुष इत्यादिना ग्रन्थेन यल्लक्षणमुक्तं तस्माद्विपरीतलक्षणमसम्पन्नः। तद्यथोत्तर-दिक्स्थः स्निग्धोऽवेपथुः सम्यक्प्राप्तो विपुल उपस्थितिः। अविकृतस्तेजस्वी स जययुक्तः। तथा गर्गः-

**बृ.सं,पृ-२९९**

एवंविधो ग्रहो जयगतो विनिर्देश्यो वक्तव्यः। तथा यो विपुलो बृहद्बिम्बः। स्निग्धो निर्मलः द्युतिमान कान्तियुक्तः। स दक्षिणस्यां दिशि स्थितोऽपि जययुक्त इति। एतत् शुक्रस्य प्रायः सम्भवति। तथा च पुलिशाचार्यः-

अन्यदप्याह-

**द्वावपि मयूखयुक्तौ विपुलौ स्निग्धौ समागमे भवतः।**

**तत्रान्योन्यं प्रीतिर्विपरीतावात्मपक्षघ्नौ।।११।।**

**युद्धं समागमे वा यद्यव्यक्तौ स्वलक्षणैर्भवतः।**

**भुवि भूभृतामपि तथा फलमव्यक्तं विनिर्देश्यम्।।१२।।**

**गुरुणा जितेऽवनिसुते बाह्लीका यायिनोऽग्निवार्ताश्च।**

**शशिजेन शूरसेनाः कलिङ्गशाल्वाश्च पीडयन्ते।।१३।।**

**सौरेणारे विजिते जयन्ति पौराः प्रजाश्च सीदन्ति।**

**कोष्ठागारम्लेच्छक्षत्रियतापश्च शुक्रजिते।।१४।।**

अवनिसुतेऽङ्गारके गुरुणा बृहस्पतिना जिते पराजिते पराभूते बाह्लीका जनाः। यायिनो जिगमिषवः। अग्निवार्ताः सुवर्णकारप्रभृतयः। एते पीड्यन्ते उपताप्यन्ते। शशिजेन बुधेन जिते भौमे शूरसेना जनाः। कलिङ्गाः शाल्वाश्च पीड्यन्ते।

सौरेण शनैश्चरेणाऽऽरेऽङ्गारके विजिते पौरा नागरा जयन्ति विजयं प्राप्नुवन्ति। प्रजाश्च सीदन्त्य-वादयन्ति। शुक्रजिते भौमे कोष्ठागाराणामवलम्बग्रामाणां म्लेच्छानां क्षत्रियाणां च तापः सन्तापो भवति। पीडा भवतीत्यर्थः।

अथ बुधस्य सर्वग्रहविजितस्य फलमाह-

**भौमेन हते शशिजे वृक्षसरित्तापसाश्मकनरेन्द्राः।**

**उत्तरदिक्स्थाः क्रतुदीक्षिताश्च सन्तापमायान्ति।।१५।।**

**गुरुणा जिते बुधे म्लेच्छशूद्रचौरार्थयुक्तपौरजनाः।**

**त्रैगर्तपार्वतीयाः पीडयन्ते कम्पते च मही।।१६।।**

**रविजेन बुधे ध्वस्ते नाविकयोधाब्जसधनगर्भियः।**

**भृगुणा जितेऽग्निकोपः सस्याम्बुदयायिविध्वंसः।।१७।।**

**जीवे शुक्राभिहते कुलूतगान्धारकैकया मद्राः।**

**शाल्वा वत्सा वङ्गा गावः सस्यानि पीड्यन्ते।।१८।।**

**भौमेन हते जीवे मध्यो देशो नरेश्वरा गावः।**

**सौरेण चार्जुनायनवसातियौधेयशिबिविप्राः।।१९।।**

**शशितनयेनापि जिते बृहस्पतौ म्लेच्छसत्यशस्त्रभृतः।**

**उपयान्ति मध्यदेशश्च संक्षयं यच्च भक्तिफलम्।।२०।।**

**जीव बृहस्पतौ शुक्राभिहते कुलुता जनाः**। गान्धराः। कैकयाः। मद्राः। शाल्वाः। वत्साः। वङ्गा। गावो धेनवः। सस्यानि धान्यादीनि पीडयन्ते।

भौमेनाङ्गारकेण हते जीवे मध्यो देशः। तथा नरेश्वरा राजानः। गावो धेनवश्च पीडयन्ते। सौरेण शनैश्चरेण हते जीवे अर्जुनायना जनाः। वसातयः। यौधेयाः। शिबयः। विप्रा ब्राह्मणाः। एत सर्व एव पीडयन्ते।

शशितनयेन बुधेन जिते बृहस्पतौ गुरौ। अपिशब्दः स्वार्थे। म्लेच्छा जनाः। सत्यभृतः सत्यवादिनः। शस्त्रभृतः शस्त्रवृत्तयः। मध्यदेशश्च। एते सर्वे संक्षयं विनाशमुपयान्ति। अन्यच्च गुरुभक्तिफलं यत्प्रागुक्तं तच्चापि संक्षयं याति।

अथ शुक्रस्य सर्वग्रहविजितस्य फलमाह-

**कोशलकलिङ्गवङ्गा वत्सा मत्स्याश्च मध्यदेशयुताः।**

**महतीं व्रजन्ति पीडां नपुसंकाः शूरसैनाश्च।।२१,२२।।**

**रविजेन सिते विजिते गुणमुख्याः शस्त्रजीविनः क्षत्रम्।**

**जलजाश्च निपीड्यन्ते सामान्यं भक्तिफलमन्यत्।।२३, २४।।**

**असिते सितेन निहतेऽर्धवृद्धिरहिविहगमानिनां पीडा।**

**क्षितिजेन तङ्गणान्ध्रोड्रकाशिबाह्लीकदेशानाम्।।२५।।**

**सौम्येन पराभूते मन्देऽङ्गवणिग्विहङ्गपशुनागाः।**

**सन्ताप्वन्ते गुरुणा स्त्रीबहुला महिषकाशकाश्च।।२६।।**

**अयं विशेषोऽभिहितो हतानां कुजज्ञवागीशसितासितानाम्।**

**फलं तु वाच्यं ग्रहभक्तितोऽन्यद्यथा तथा ध्नन्ति हताः स्वभक्तीः।।२७।।**

कुजोऽङ्गारकः। ज्ञो बुधः। वागीशो बृहस्पतिः। सितः शुक्रः। असितः शनैश्चरः। एषां हतानां जितानामयं विशेषोऽभिहित उक्तः। अन्यदपरं यत्फलं तद्ग्रहस्य भक्तितो वाच्यम्। यथा येन प्रकारेण व्यक्तेनाऽव्यक्तेन वा हता जितास्तथा तेनैव प्रकारेणं व्यक्तमव्यक्तं वा कृत्वा स्वभक्तीर्ध्नन्ति विनाशयन्तीत्यर्थः। तथा च पराशरः- **बृ.सं,पृ-३०४**

## ५. राशिग्रहसमागमाध्यायः

तत्रादावेव चन्द्रमसो गतिलक्षणमाह-

**भानां यथासम्भवमुत्तरेण यातो ग्रहाणां यदि वा शशाङ्कः।**

**प्रदक्षिणं तच्छुभदं नृपाणां याम्येन यातो न शिवः शशाङ्कः।।१।।**

**चन्द्रमा यदि कुजस्य यात्युदक् पार्वतीयबलशालिनां जयः।**

**क्षत्रियाः प्रमुदिताः सयायिनो भूरिधान्यमुदिता वसुन्धरा।।२।।**

कुजस्याङ्गारकस्य चन्द्रमाः शशी यद्युदगुत्तरेण याति गच्छति तदा पार्वतीयानां पर्वतनिवासिनाम्। बलशालिनां बलेन ये शालन्ते श्लाध्यन्ते तेषां च जयो भवति। तथा च सयायिनो यायिभिः सहिताः क्षत्रियाः प्रमुदिता हष्टा भवन्ति। तथा च वसुन्धरा भूः। भूरिधान्येन बहुधान्येन मुदिता हष्टा भवति।

अथ बुधस्याह-

**उत्तरतः स्वसुतस्य शशाङ्कः पौरजयाय सुभिक्षकरश्च।**

**सस्यचयं कुरुते जनहार्दिं कोशचयं च नराधिपतीनाम्।।३।।**

शशाङ्कश्चन्द्र। स्वसुतस्यात्मीयपुत्रस्य बुधस्योत्तरत उत्तरेण यदि याति तदा पौराणां नृपाणां जयाय भवति सुभिक्षं च करोति। तथा च सस्यानां चयमुपचयं जनानां लोकानां च हार्दिं तृष्टिं नराधिपतीनां राज्ञां कोशचयं भाण्डागारवृद्धिं च करोति।

अथ गुरोराह-

**बृहस्पतेरुत्तरगे शशाङ्के पौरद्विजक्षत्रियपण्डितानाम्।**

**धर्मस्य देशस्य च मध्यमस्य वृद्धिः सुभिक्षं मुदिताः प्रजाश्च।।४।।**

**भार्गवस्य यदि यात्युदक् शशी कोशयुक्तगजवाजिवृद्धिदः।**

**यायिनां च विजयो धनुष्मतां सस्यसम्पदपि चोत्तमा तदा।।५।।**

भार्गवस्य शुक्रस्य शशी चन्द्रो यद्युदगुत्तरेण याति तदा कोशयुक्तानां सञ्चितभाण्डागाराणां गजानां वाजिनामश्वानां च वृद्धिप्रदो भवति। तथा धनुष्मतां धनुर्भुतां यायिनां च जिगमिषूणां विजयो भवति। सस्यानामपि चोत्तमा तदा तस्मिन् काले सम्पद्भवति। अपिशब्दोऽ-त्रातीवार्थे।

अथ सौरस्याह

**रविजस्य शशी प्रदक्षिणं कुर्याच्चेत्पुरभुभृतां जयः।**

**शकबाह्लिकसिन्धुपह्लवा मुदभाजो यवनैः समन्विताः।।६ ।।**

**येषामुदग्गच्छति भग्रहाणां प्रालेयरश्मिर्निरुपद्रवश्च।**

**तद्द्रव्यपौरेतरभक्तिदेशान् पुष्णाति याम्येन निहन्ति तानि।।७।।**

**शशिनि फलमुदक्स्थे यद् ग्रहस्योपदिष्टं**

**भवति तदपसव्ये सर्वमेव प्रतीपम्।**

**इति शशिसमवायाः कीर्तिता भग्रहाणां**

**न खलु भवति युद्धं साकमिन्दोर्ग्रहर्क्षैः।।८।।**

शशिनि चन्द्रमसि ग्रहस्योदक्स्थे उत्तरस्यां दिशि स्थिते यत्फलमुपदिष्टमुक्तम् चन्द्रमा यदि कुजस्य यात्युदक् इत्यादिकम् तत्सर्वमेव निः शेषमपसव्ये दक्षिणदिक्स्थे चन्द्रे प्रतीपं विपरीतं भवति। इत्येवंप्रकारा भग्रहाणां भानां नक्षत्राणां ग्रहाणां च शशिसमवायाश्चन्द्रसंयोगाः कीर्तिता उक्ताः खलु। खल्वित्ययं शब्दो निश्चयार्थे। इन्दोश्चन्द्रस्य ग्रहैर्भौमादिभिर्ऋक्षैर्नक्षत्रैश्च साकं सह युद्धं न भवतीति किल सूर्यस्य ग्रहैः सह समागमोऽस्तमयशब्दवाच्यः, चन्द्रेण सह समागमशब्द-वाच्यः। भौमादीनां परस्परं युद्धशब्दवाच्य इत्ययमस्मिन् शास्त्रे सिद्धान्तः। तथाऽऽचार्य-विष्णुचन्द्रः।

## ६. ग्रहवर्षफलाध्यायः

कस्य ग्रहस्य कस्मिन् वर्षे कीदृशानि शुभाशुभानि फलानि भवन्तीति। यत आचार्येण पूर्वमेव प्रतिज्ञातमासीत् -

वर्षे यद्यस्य फलं मासे च मुनिप्रणीतमालोक्य।
तत्तद्वृत्तैर्वक्ष्ये होरातन्त्रोत्तरविधाने।।इति।।

तत्रादावेवादित्यस्य वर्षफलमाह-

**सर्वत्र भूर्विरलसस्ययुता वनानि दैवाद्विभक्षयिषुदंष्ट्रिसमावृतानि।**
**स्यन्दन्ति नैव च पयः प्रचुरं स्त्रवन्त्यो रुग्भेषजानि न तथातिबलान्क्तिानि।।१।।**

**तीक्ष्णं तपत्यदितिजः शिशिरेऽपि काले नात्यम्बुदा जलमुचोऽचलसन्निकाशाः ।**
**नष्टप्रभर्क्षगणशीतकरं नभश्च सीदन्ति तापसकुलानि सगोकुलानि।।२।।**

**हस्त्यश्वपत्तिमदसह्यबलैरुपेता बाणासनासिमुसलातिशयाश्चरन्ति।**
**ध्नन्तो नृपा युदि नृपानुचरैश्व देशान् संवत्सरे दिनकरस्य दिनेऽथ मासे।।३।।**

दिनकस्यादित्यस्यं संवत्सरे वर्षे दिने वा तद्वारे मासे वा ईदृशानि फलानि भवन्ति। तथा च यवनेश्वरः - **बृ.सं,पृ-३०९**

एवं वर्षजं फलं मासदिवसहोरास्वपि बोद्धव्यम्।

तत्र रविवर्षे मासे दिन वा कीदृशानि फलानि ? सर्वत्र सर्वस्मिन् देशे भूरवनिर्विरलैस्तनुभिः स्वल्पैः सस्यैर्धान्यादिभिर्युता संयुक्ता भवति। तथैव वनानि अरण्यानि दंष्ट्रिभिः सर्पवराहादिभिः समावृतानि संयुक्तानि भवन्ति। कीदृशैर्दंष्ट्रिभिः? दैवाद्दैवहेतोर्ये बिभक्षयिषवो भक्षयितुमिच्छवस्तथाभूतैः। दैवशब्देन प्राक्कर्मोच्यते। तथा चोक्तम् —

तस्माद्वनानि दैवाद् बिभक्षयिषुर्दंष्ट्रिसमावृतानि भवन्ति। नद्यः सरितः प्रचुरं प्रभूतं पयो जलं न स्त्रवन्ति न स्यन्दन्ति। रुजां रोगाणामुपशमार्थं यानि च भैषजानि द्रव्याणि तानि न तथा तेनैव प्रकारेणातिबलान्वितानि वीर्ययुक्तानि भवन्ति। रोगोपशान्तिं सम्यग् न कुर्वन्तीत्यर्थः।

तथा अदितिज आदित्यः। शिशिरेऽपि काले माघफाल्गुनमासयोः शीतकालेऽपि तीक्ष्णमतिचण्डं तपति सन्तापयति। अम्बुदा मेघा अचलसन्निकाशाः पर्वताकारा अपि नातिजलमुचो न प्रभूतं जलं मुञ्चन्तिं त्यजन्ति। तथा नभ आकाशं कीदृशं नष्टप्रभर्क्षगण-

शीतकरम् नष्टप्रभो विगतकान्तिर्ऋक्षगणो नक्षत्रसमूहः शीतकरश्चन्द्रमा यत्र तत्। तापसकुलानि तपस्विनां वंशाः। सगोकुलानि गोकुलेन सहितानि सीदन्त्यवसाद्यन्ति।

तथा नृपा राजानो युधि संग्रामे नृपानुचरैः सचिवैर्लोकपालैः सह साकं देशान् विषयान् ध्नन्नो जिघांसन्तो विचरन्ति गच्छन्ति। कीदृशा नृपाः? हस्त्यश्वपतिमदसह्यबलैरुपेताः। हस्तिनो गजाः। अश्वास्तुरगाः। पत्तयः पदातयो विद्यन्ते येषु बलेषु तानि। तथाभूतैतिशयाः। बाणासनासिमुशलातिशयाः। बाणा अस्यन्ते क्षिप्यन्ते येन तद्वाणासनं धनुः। असिः खड्गः। मुशल आयुधविशेषो मुशलाकार एव। तेषु अतिशयो यत्नो येषां ते तथाभूताः। तथा च यवनेश्वरः। **बृ.सं,पृ-३१०**

अथ चन्द्रमस आह-

**व्याप्तं नभः प्रचलिताचलसन्निकाशैर्व्यालाञ्जनालिगवलच्छविभिः पयोदैः।**
**गां पूरयद्भिरखिलाममलाभिरद्भिरुत्कण्ठितेन गुरुणा ध्वनितेन चाशाः।।४।।**
**गोधूमशालियवधान्य वरेक्षुवाटा भूः पाल्यते नृपतिभिर्नगराकराढ्या ।**
**चित्यङ्किता क्रतुपरेष्टिविघुष्टनादा संवत्सरे शिशिरगोरभिसम्प्रवृत्ते।।५, ६।।**

**वातोद्धतश्चरति वह्निरतिप्रचण्डो ग्रामान् वनानि नगराणि च सन्दिधक्षुः।**
**हाहेति दस्युगणपातहता रटन्ति निस्वीकृता विपशवो भुवि मर्त्यङ्घाः।।७।।**
**भूपा न सम्यगभिपालनसक्तचिताः पित्तोत्थरुक्प्रचुरता भुजगप्रकोपः।**
**एवंविधैरुपहता भवति प्रजेयं संवत्सरेऽवनिसुतस्य विपन्नसस्या ।।८, ९।।**

अवनिसुतस्याङ्गारकस्यं संवत्सरे वर्षे मासे दिवसे वा फलानीदृशानि भवन्ति। कीदृशानि ? वह्निरग्निर्वातेन मारुतेनोद्धतः सञ्चार्यमाणोऽतिप्रचण्डो दुःसहश्चरति। कीदृशः? ग्रामान वनानि नगराणि पत्तनादि च सन्दिधक्षुः सन्दग्धुमिच्छुः। तथा भुवि भूमौ मर्त्यसङ्घा मनुष्यसमूहाः। दस्यूनां चौराणां ये गणाः समूहास्तेषां पातैर्हताः परिपीडिताः सन्तो हाहेति रटन्ति रणन्ति हाहाशब्दं कुर्वन्ति। कीदृशाः? निः स्वीकृता निर्द्धनीकृताः। विपशवो विगताः पशवश्चतृष्पदा येम्भः।

तथा पयोदा मेघा वियत्याकाशे अभ्युन्नताः अभिमुखयेनोच्चाः। संहतमूर्तयो घनदेहा अपि कुत्रचिदपो जलं प्रचुरंबहु मुञ्चन्ति त्यजन्ति। तथा सीम्नि जलप्रवेशमार्गेऽपि प्रजातम्। निम्ने प्रजातमिति केचित् पठन्ति। निम्ने प्रजातमुत्पन्नं सस्यं धान्यादिकं शोषं नीरसत्व-मुपैति

प्राप्नोति। तथा निष्पन्नमपि सञ्जातमपि सस्यमपरे अन्ये शत्रव उत्पाता वा अविनयादनीत्या अशनिप्रपातादिना वा हरन्त्यपनयन्ति।

तथा भूपा राजानः सम्यग्धर्मेणाभिपालने रक्षणे सक्तचितास्तत्परा न भवन्ति। तथा पित्तोत्थानां रुजां रोगाणां प्रचुरता बाहुल्यं भवति। भुजगेभ्यः प्रकोपो लोकानां पीडा भवति। एवंविधैरीदृशैर्दोषैरियं प्रजा जनसमूहा उपहता पीडिता भवति। तथा विपन्नसस्या च। तथा च यवनेश्वरः- **बृ.सं,पृ-३१३**

अथ बुधस्याह-

**मायेन्द्रजालकुहाकाकरनागराणां गान्धर्वलेखगणितास्त्रविदां च वृद्धिः।**

**पिप्रीषया नृपतयोऽभ्दुतदर्शनानि दित्सन्ति तुष्टिजनना नि परस्परेभ्यः।।१०।।**

**वार्ता जगत्यवितथा विकला त्रयी च सम्यक् चरत्यपि मनोरिव दण्डनीतिः ।**

**अध्यक्षरं स्वभिनिविष्टधियोऽत्र केचिदान्वीक्षिकीषु च परं पदमीहमानाः।।११।।**

**हास्यज्ञदूतकविबालनपुसंकानां युक्तिज्ञसेतुजलपर्वतवासिनां च।**

**हार्दि करोति मृगलाञ्छनजः स्वकेऽब्दे मासेऽथवा प्रचुरता भुवि चौषधीनाम्।।१२।।**

तथा हास्यज्ञानामुपहासविदा विदग्धानाम्। दूतानां गमागमिकानाम्। कवीनां पण्डितानां काव्याज्ञानाम्। बालानां शिशूनाम्। नपुंसकानां क्लीबानाम्। युक्तिज्ञानां युक्तिविदां प्रयोगज्ञानाम्। सेतुवासिनां स्थलवासिनां सेतौ ये वसन्ति। जलवासिनां जलसमीपस्थितानाम्। पर्वतवासिनां हार्दिं चित्ते तृष्टिं करोति। तथा भूवि भूमौ औषधीनां प्रचुरता बाहुल्यं भवति। तथा च यवनेश्वरः- **बृ.सं,पृ-३१४**

अथ गुरोवर्षफफलमाह-

**विविधैर्वियदुन्नतेः पयोदैर्वृतमुर्वी पयसाभिर्पयभ्दिः।**

**सुरराजगुरो : शुभेऽत्र वर्षे बहुसस्या क्षितिरुत्तमद्धियुक्ता ।।१३, १४, १५।।**

सुरराज इन्द्रः। तस्य गुरुर्जीवः। तस्य सुरराजगुरोः शुभे शोभने वर्षे मासे दिवसे वा फलान्येतानि भवन्ति। नन्वत्र सर्वग्रहाणां वर्षफलानिं सामान्येनाभिहितानि भवन्ति। अत्र तु किमर्थं शुभग्रहणमित्यत्रोच्यते- अथैकदेशे पिङ्गलकालयुक्तरौद्रसंज्ञानि वर्षाण्यशुभफलान्युक्तानि। तेषु सत्यपि गुरौ वर्षपतित्वे न तथा फलानि परिपूर्णानि भवन्ति। यदा तु पुनः प्रभवविभशु-क्लप्रमोदवर्षाणि शुभानि भवन्ति , तदा तेषु गुरौ वर्षपतित्वे सत्येतानि परिपूर्णानि भवन्त्यम् उक्तम् - शुभे तु वर्ष इति। कीदृशानि तानि फलानि ? ध्वनिरुच्चरित इति। द्विजोत्तमानां

ब्राह्मणप्रधानानामध्वरे यज्ञे ध्वनिः शब्द उच्चरित उद्घोषो विपुलो विस्तीर्णः। अनिशं रात्रिवर्जितम्। द्युगामी स्वर्गामी। विचरति गच्छति। कीदृशो ध्वनिः? यज्ञमुषां यज्ञविध्नकर्तुणां राक्षसानां मनांसि चेतांसि भिन्दन् विदारयन्। तथा अध्वरांशभाजां यज्ञभागिनामिन्द्रादीनां हृदये चेतसि आनन्दकरः।

क्षितिर्भूः क्षितिपैर्भूम्यधिपतिभिः। अभिमुख्येन सम्यक् पालनेन रक्षणेन प्रवृद्धा वृद्धिं गता विभति शोभते। तदा तस्मिन् वर्षे। कीदृशी ? उत्तमसस्यवती। उत्तमानि प्रधानानि सस्यानि धान्यादीनि विद्यन्ते यस्याम्। अनेकैर्बहुभिर्द्विपैर्गजैः। पत्तिभिः पदातिभिः। अश्वैस्तुरगैः। धनैर्वितैः। उरुभिर्विस्तीर्णैः। गोकुलैर्गोवाटैराढया समृद्धा भवति। तथा द्युचरस्पर्द्धिजना। द्युचरा देवास्तेषां स्पर्द्धिनः सदृशा जना यस्याम्।

वियदाकाशं पयोदैर्मेघैः। विविधैर्नानाकारैरुन्नतैरुच्चैर्वृतं व्याप्तम्। किं कुर्वद्भिः? उर्वी भूमिं पयसा जलेन अभि सामस्त्येन विशेषेण तर्पयद्भिः प्रीणयद्भिः। अनवरतभकालानुवर्षणात्। तथा क्षितिर्भूमिर्बहुसस्या प्रभूतधान्या। उत्तमद्धर्या प्रधानया समृद्धया च युक्ता भवति। तथा च यवनेश्वरः- **बृ.सं,पृ-३१६**

अथ शुक्रस्याह-

**शालीक्षुमत्यपि धरा धरणीधराभधाराधरोज्झितपयः परिपूर्णवप्रा ।**
**श्रीमत्सरोरुहतताम्बुतडागकीर्णा योषेव भात्यभिनवाभरणोज्ज्वलाङ्गी ।।१६।।**

**क्षत्रं क्षितौ क्षपितभूरिबलारिपक्षमुद्घुष्टनैकजयशब्दविराविताशम् ।**
**संहृष्टशिष्टजनदुष्टविनष्टवर्गा गां पालयन्त्यवनिपानगराकराढयाम् ।।१७।।**

**पेपीयते मधु मधौ सह कामिनीभिर्जेगीयते श्रवणहारि सवेणुवीणम्।**
**बोभुज्यतेऽतिथिसुहृत्स्वजनैः सहान्नमब्दे सितस्य मदनस्य जयावघोषः।।१८।।**

**वातोद्धताम्बुधरवर्जितमन्तरिक्षमारुग्णनैकविटपं च धरातलं द्यौः ।**
**नष्टार्कचन्द्रोकिरणातिरजोऽवनद्धा तोयाशयाश्च विजलाः सरितोऽपि तन्व्यः।।१९. २०।।**

**जातानि कुत्र विदतोयतया विनामृच्छन्ति पुष्टिमपराणि जलोक्षितानि।**
**सस्यानि मन्दमभिवर्षति वृत्रशत्रौ वर्षे दिवाकरसुतस्य सदा प्रवृत्ते।।२१।।**

दिनकरसुतस्य सौरस्य वर्षे अब्दे प्रवृत्ते वर्तमाने मासे दिवसे वा सदा सर्वकालमेतानि फलानि भवन्ति। कीदृशानि ? उद्धतदस्युगणभूरिरणाकुलानि। उद्धत उद्गतो योऽसौ दस्युगणी

दस्यूनां चौराणां समूहस्तेन भूरि बहुप्रकारा ये रणाः संग्रामास्तैराकुलानि सोद्यमानि राष्ट्राणि नृपकुलानि भवन्ति। तथा अनेके प्रभूता ये पशवश्चतुष्पदाः। वित्तानि धनानि। तैश्च विनाकृतानि वर्जितानि रहितानि। हताः संग्रामे बन्धुजना येषां जनानां ते हतबन्धुजना रोरूयमाणा अत्यर्थं रोदमानाश्च ते जनास्तैस्तथाभूतैर्जनैश्चाकुलानि सोद्यमानि कुलानि वंशाः। तथा रोगोत्तमैर्ग-दप्रधानैर्बुभुक्षया क्षुधा वाऽऽकुलानि भवन्ति।

**अणुरपटुमयूखो नीचगोऽन्यैर्जितो वा न सकलफलदाता पुष्टिदोऽतोऽन्यथा यः।**
**यदशुभमशुभेऽब्दे मासजं तस्य वृद्धि : शुभफलमपि चैवं पाप्यमन्योऽन्यतायाम्।।२२।।**

## ७. ग्रहश्रृङ्गाटकाध्यायः

तत्रादावेव दिक्फलप्रतिपादनार्थमाह-

**यस्यां दिशि द्दश्यन्ते विशन्ति ताराग्रहा रविं सर्वे।**

**भवति भयं दिशि तस्यामायुधकोपक्षुधातङ्कैः।।१।।**

यस्यां दिशि यत्राशायां सर्वे एव ताराग्रहा भौमबुधगुरुसितसौरा दृश्यन्ते लोकैरव-लोक्यन्ते। तथा रविमादित्यं प्रति यस्यां दिशि विशन्ति अस्तमयं यान्ति तस्यां दिशि भयं भवति। कैः आयुधकोपक्षुधातङ्कैः। आयुधकोपेन शस्त्रकोपेन, क्षुधा दुर्भिक्षेण आतङ्कैरुपद्रवैः। तथा च काश्यपः- **बृ.सं,पृ-३२१**

अधुना तेषामेव ग्रहाणां संस्थानप्रदर्शनार्थमाह-

**चकधनुः श्रृङ्गाटकदण्डपुरप्रासवज्नसंस्थानाः ।**

**क्षुदवृष्टिकरा लोके समराय च मानवेन्द्राणाम् ।।२।।**

चक्रं चक्राकारम्। धनुश्चापम्। श्रृङ्गाटकं त्रिकोणम्। दण्डं दण्डाकारम्। पुरं पुराकारमेव प्रासादसदृशम्। प्रासमायुधविशेषः कुन्ताकारम्। वज्र ं वज्राकरं मध्यक्षममुभयाग्रविस्तीर्णम्। एवं चक्रादिसंस्थानां ग्रहाः। संस्थानमाकृतिः। लोके सर्वत्र जनपदे क्षुदवृष्टिकराः। क्षुद् दुर्भिक्षमवृष्टिं च कुर्वन्ति। तथा मानवेन्द्राणां राज्ञां समराय संग्रामाय च भवन्ति। अर्थादेवोक्त संस्थानं विना यथा तथा स्थितानां शुभं फलं कुर्वन्तीति। तथा च काश्यपः- **बृ.सं,पृ-३२१**

अथान्तरिक्षप्रविभागेनाशुभं फलमाह-

**यस्मिन् खांशे द्दश्या ग्रहमाला दिनकरे दिनान्तगते।**

**तत्रान्यो भवति नृपः परचक्रोपद्रवश्च महान्।।३।।**

**तस्मिन्नृक्षे कुर्युः समागमं तज्जनान् ग्रहा हन्युः।**

**अविभेदनाः परस्परममलमयूखाः शिवास्तेषाम्।।४।।**

यस्मिनन्नृक्षे यत्र नक्षत्रे ग्रहाः समागमं सम्प्रयोगं कुर्युस्तस्य नक्षत्रस्य ये जना नक्षत्रकूर्मेण नक्षत्रव्यूहेन च कथितास्तान् हन्युर्नाशयेषुः। तदा च एव ग्रहाः परस्परमन्योन्यम-विभेदिनश्छाद्यच्छा-दकभावेन स्थिता अमलमयूखा निर्मलरश्मयस्तेषामेव जनानां शिवाः श्रेयस्करा भवन्ति। तथा च समाससंहितायाम्- **बृ.सं,पृ-३२२**

अथ योगषट्कस्य नामान्याह-

**ग्रहसंवर्तसमागमसम्मोहसमाजसान्निपाताख्या।**

**कोशश्चेत्येषामभिधास्ये लक्षणं सफलम्।।५।।**

**एकर्क्षे चत्वारः सह पौरैर्यायिनोऽथवा पञ्च।**

**संवर्तो नाम भवेच्छिखिराहुयुतः स सम्मोहः।।६।।**

**पौरः पौरसमेतो यायी सह यायिना समाजाख्यः।**

**यमजीवसङ्गमेऽन्यो यद्यागच्छेत्तदा कोशः।।७।।**

**उदितः पश्चादेकः प्राक् चान्यो यदि स सन्निपाताख्यः।**

**अविकृततनवः स्निग्धा विपुलाश्च समागमे धन्याः।।८।।**

पौरो ग्रहः पौरेण ग्रहेण समेतः संयुक्तो यदि यायी यायिना वा सह यद्येकस्मिन्नृक्षे भवति तदा स समाजाख्यो योगो भवति। समाजेत्याख्या यस्य। यमः सौरो जीवो गुरुः। अनयो सङ्गमे संयोगे यद्यनयः कश्चिद् ग्रह आगच्छेतदा कोशाख्यो योगः।

एको ग्रहः पश्चात् पश्चिमायां दिश्युदितः। आदित्यमण्डलान्निर्गतः। अन्यो द्वितीयः प्राक् च पूर्वस्यां दिशि अर्कमणडलादेवोद्धतस्तौ तथाभूतौ यद्येकर्क्षं गतौ भवतस्तदा स सन्निपाताख्यो योगः। एतेषां पञ्चानां संस्थानानामभावे यो ग्रहसंयोगः समागम इति ज्ञेयः। तत्र च समागमे सर्व एव ताराग्रहा अविकृततनवो निर्विकारशरीराः स्निग्धा निर्मला विपुला विस्तीर्णाश्च धन्याः शुभाः अन्यथा अशुभा इति। तथा च समासंसंहितायाम् - **बृ.सं,पृ-३२३**

अथैतेषां फलान्याह-

**समौ तु संवर्तसमागमाख्यौ सम्मोहकोशौ भयदौ प्रजानाम्।**

**समाजसंज्ञः सुसमः प्रदिष्टो वैरप्रकोपः खलु सन्निपाते।।९।।**

संवर्तसमागमाख्यौ द्वौ योगौ समौ। न शुभं नाप्यशुभं कुर्वाते इत्यर्थः। यादृशा भावाः पूर्वमभूवंस्तादृशा एव संवर्तसमागमयोरिति। सम्मोहकोशौ प्रजानां लोकानां भयदौ भयं ददतः। समाजसंज्ञे समाजाख्ये सुसमा सुशोभना समा प्रदिष्टा उक्ता। तद्वर्षं शोभनं भवतीत्यर्थः। केचिद्बहुवचनं पठन्ति। सुसमाः प्रदिष्टा इति। सुसमा भावाः प्रदिष्टा उक्ताः। यादृशाः पूर्वमभूवन् तदधिका भवन्तीत्यर्थः। सन्निपाते वैरप्रकोपः। लोकानां परस्परं वैरं भवति। खलुशब्द आगमद्योतनार्थः। तथा च काश्यपः- **बृ.सं,पृ-३२४**